दिनाङ्क :- 30.09.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- जम्मू-कश्मीरे तृतीयान्तिम-चरणाय विधानसभा निर्वाचनाय श्वः मतदानं भविष्यति।

- राष्ट्रपतिना प्रोक्तं यत् विधि-व्यवस्थे न केवलं शासनस्य आधारशिले स्तः, अपितु एते आधुनिकराज्यस्य आधाररूपेण स्थीयेते ।

- जमैका-देशस्य प्रधानमन्त्री एन्ड्रू-होल्नेस् भारतस्य चतुर्दिवसीयायां यात्रायां नवदिल्लीं प्राप्तवान् ।

- प्रतिष्ठिताभिनेता मिथुन-चक्रवर्ती आगामि मासे सप्ततितमे राष्ट्रिय-चलच्चित्र-पुरस्कार-समारोहे दादा-साहेब-फाल्के-पुरस्कारेण सम्मानितो भविष्यति ।

- बिहारे कोसी-गण्डक-जलावरोधात् त्यक्तेन जलेन अद्य अनेकेषु बिहारस्य क्षेत्रेषु जलं प्रविष्टम्। राष्ट्रिय आपत् मोचन दलस्य षट् अतिरिक्तदलानि आनीतानि सन्ति।

----------------

## जम्मू-कश्मीर - निर्वाचन व्यवस्था:

जम्मू-कश्मीरे तृतीयान्तिम-चरणाय विधानसभा निर्वाचनाय श्वः मतदानं भविष्यति। सुचारुरीत्या, शान्तिपूर्णतया, घटनां बिनैव च मतदानस्य कृते विस्तृतसुरक्षाव्यवस्था कृता अस्ति। अस्मिन् चरणे सप्त मण्डलानां चत्वारिंशत् विधानसभाक्षेत्राणि निर्वाचन समरांगणे सन्ति, येषु, षोडश कश्मीरमण्डले, चतुर्विंशति जम्मूक्षेत्रे च सन्ति। अस्मिन् चरणे पञ्चदशोत्तर चतुःशतं अभ्यर्थीनां भाग्यस्य निर्णयः ऊनचत्वारिंशत् लक्षाधिकाः मतदातारः करिष्यन्ति। मतदानं प्रातः सप्त वादनादारभ्य सायं षड् वादनं यावत् भविष्यति। मतगणना हरियाणा राज्येन सहैव अक्टोबर् मासस्य अष्टमे दिनाङ्के भविष्यति।

## द्रौपदीमुर्मु-भारतीय-आरक्षि-सेवा

त्रयोविंशत्युत्तर-द्विसहस्रतमस्य सत्रस्य भारतीय-आरक्षि-सेवायाः परिवीक्षाधीनानाम् एकेन समूहेन अद्य राष्ट्रपति-भवने राष्ट्रपतिना द्रौपदी-मुर्मू-वर्यया सह मेलनं कृतमस्ति । परिवीक्षाधीनान् संबोधयन्त्या राष्ट्रपतिना मुर्मू-वर्यया प्रोक्तं यत् विभिन्नाखिल-भारतीय-सेवासु भारतीयारक्षि-सेवायाः स्वकीयम् अद्वितीय-महत्वम् वर्तते। राष्ट्रपतिना प्रोक्तं यत् विधि-व्यवस्थे न केवलं शासनस्य आधारशिले स्तः, अपितु एते आधुनिकराज्यस्य आधाररूपेण स्थीयेते। मुर्मू-वर्यया प्रोक्तं यत् आगामि वर्षेषु भारतं नवीनोन्नतिं यावत् गन्तुं लक्ष्यं कामयति, तस्मिन् समये भारतीय-आरक्षि-सेवा-अधिकारिणां भूमिका इतोऽपि महत्वपूर्णा भविष्यति।

